नदीशः ४ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । अस्रप्रदत्वम् । गुरुत्वम् । वातलत्वम् । कफदत्वम् । रूक्षत्वम् । कामायत्वम् । विषदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

नदीमातृकः, त्रि, (नदी मातेव पोषिका यस्य । कप् ।) नद्यम्बुसम्पन्नव्रीहिपालितदेशः । इत्यमरः । २ । १ । १२ ॥

नदीवङ्कः, पुं, (नद्या वङ्कः ।) वङ्कुरः । इति शब्दमाला ॥ बाँक इति भाषा ॥

नदीवटः, पुं, (नदीसमीपजातो वटः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥

नदीष्णः, त्रि, (नद्यां स्नातीति । स्ना + "सुपि स्थः ।" ३।२।४ । इति कः । "निनदीभ्यां स्नातेः कौशले ।" ८ । ३ । ८९ । इति षत्वम् ।) नद्यवगाहनदक्षः । नदीस्नानकुशलः । इति भट्टिटीकायां पुण्डरीकाक्षः ॥ नदीशः । इति पुरुषोत्तमः ॥ यथा,—
"ततो नदीष्णान् पथिकान् गिरिज्ञान् ।"
इति भट्टिः ॥

नदीसर्ज्जः, पुं, (नद्याः सर्ज्ज इव । नदीतीरजातत्वादस्य तथात्वम् ।) अर्ज्जुनवृक्षः । इत्यमरः । २ । ४ । ४५ ॥ (पर्य्यायोऽस्य यथा,—
"ककुभोऽर्ज्जुननामाख्यो नदीसर्ज्जश्च कीर्त्तितः ।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नदेयी, स्त्री, (नद्यां भवा । "नद्यादिभ्यो ढक् ।" ४।२।९७ । इति ढक् । पृषोदरादित्वात् ह्रस्वः ।) नादेयी । भूमिजम्बुः । इति शब्दचन्द्रिका ॥

नद्धः, त्रि, (नह्यते स्मेति । नह + क्तः ।) बद्धः । (यथा, हरिवंशे । २३२ । १७ ।
"दिव्यैश्च कवचैर्नद्धा दिव्यैश्चैवोच्छ्रितैर्ध्वजैः ॥")
उद्वृत्तः । इति मेदिनी । धे, ६ ॥

नद्ध्री, स्त्री, (नह्यतेऽनया । नह + दाम्नीति ष्ट्रन् । ततो ङीष् ।) चर्म्मरज्जुः । इत्यमरः ।२।१०।३२॥ (यथा, प्रद्युम्नविजये चतुर्थाङ्के ।
"अद्यापि धिग् धनुषि पुष्पकलत्रमित्रनद्ध्रीवनद्धहृदयो न च तं स्मरामि ॥")

नद्याम्रः, पुं, (नद्या आम्र इव ।) समष्ठिलावृक्षः । इति राजनिर्घण्टः ॥

नद्युत्सृष्टः, त्रि, (नद्या उत्सृष्टः ।) नदीकर्त्तृकत्यक्तवस्तु । तद्रूपभूखण्डस्य चर इति चड़ा इति च भाषा ॥ नद्युत्सृष्टा भूमिस्तु यस्याधिकारे जाता तस्यैव भवति । यथा,—
"नद्युत्सृष्टा राजदत्ता यस्य तस्यैव सा मही ।
अन्यथा न भवेल्लाभो नराणां राजदैविकः ॥
चयोदयौ जीवनस्य दैवराजवशान्नृणाम् ।
तस्मात् सर्व्वेषु कार्य्येषु तत्कृतं न विचालयेत् ॥"
इति विवादचिन्तामणिविवादरत्नाकरवीरमित्रोदयप्रभृतिग्रन्थधृतवचनम् ॥

ननन्दा, [ऋ] स्त्री, (न नन्दति तुष्यति सेवयापि । नञ् + नन्द + "नप्तृनेष्टृ-" इत्यादि । "नञि च नन्देः ।" उणां २ । ९९ । इति ऋन् । केषाञ्चिन्मतेन वृद्धाभावः ।) भर्त्तृभगिनी । ननद इति भाषा ॥ तत्पर्य्यायः । ननान्दा २ नन्दिनी ३ नन्दा ४ पतिस्वसा ५ । इति शब्दरत्नावली ॥

ननान्दा, [ऋ] स्त्री, (न नन्दति सेवयापि । नन्द + "नञि च नन्देः ।" उणां २ । ९९ । इति ऋन् वृद्धिश्च ।) ननन्दा । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १० । ८५ । ४६ ।
"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥")

ननु, अ, (न नुदति प्रेरयतीति । नुद + मितद्र्वादित्वात् डुः ।) प्रश्नः । पृच्छा । अवधारणम् । (यथा, रघुः । १ । ६० ।
"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम् ॥")
निश्चयः । (यथा, महाभारते । १३ । ६ । १९ ।
"लोको दैवं समालोक्य उदासीनो भवेन्ननु ॥")
अनुज्ञा । (यथा, शिशुपालवधे । ९ । ६१ ।
"ननु सन्दिशेति सुदृशोदितया
त्रपया न किञ्चन किलाभिदधे ॥")
अनुमतिः । अनुनयः । सान्त्वनम् । आमन्त्रणम् । सम्बोधनम् । (यथा, कुमारे । ४ । ३२ ।
"विधुरां ज्वलनातिसर्ज्जनात्
ननु मां प्रापय पत्युरन्तिकम् ॥")
एषामुदाहरणानि यथा,—
"प्रश्ने नन्वध्येष्यामहे । अवधारणे ननु गच्छामः । अनुज्ञायां सर्व्वैर्ननु ज्ञायताम् । अनुनये ननु चलि ! प्रसीद । आमन्त्रणे ननु चैत्र । विरोधोक्तिः । इत्यमरभरतौ ॥ विनिग्रहः । अनुप्रश्नः । परकृतिः । अधिकारः । सम्भ्रमः । इति मेदिनी । ने, ४४ ॥ आक्षेपः । प्रत्युक्तिः । वाक्यारम्भः । इति हेमचन्द्रः । ६ । १०८ ॥ उत्प्रेक्षालङ्कारव्यञ्जकम् । यथा,—
"मन्ये शङ्के ध्रुवं नूनं किंवा प्रायोऽनुवेद्मि च ।
ननु नाम हि जानामि उत्प्रेक्षाव्यञ्जकानि च ॥"
इति काव्यचन्द्रिका ॥

ननुच, अ, विरोधोक्तिः । इत्यमरः । ३ । ४ । १४ ॥ ननुचेति समुदितं विरोधवचने ननुशब्दो विरोधोक्तौ चकारात् ननुचेति वा । इति भरतः ॥

नन्दः, पुं, (नन्दतीति । नन्द + पचाद्यच् ।) विष्णुः । यथा । "आनन्दो नन्दनो नन्दः ।" इति महाभारते । १३ । १४९ । ६९ ॥ नरपतिभेदः । स तु महानन्दिसुतः क्षत्रियवंशान्तः । (यथा, भागवते । १२ । १ । ७—११ ।
"महानन्दिसुतो राजन् ! शूद्रागर्भोद्भवो बली ।
महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ।
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्म्मिकाः ॥
स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः ।
शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥
तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः ।
य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः ॥
नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ ॥")
आनन्दः । निधिविशेषः । इति पुराणशब्दरत्नावल्यौ ॥ गोपभेदः । स च श्रीकृष्णपिता । नन्दः पुरा द्रोणनामा वसुरासीत् । यथा,—
"द्रोणो वसूनां प्रवरो धरया सह भार्य्यया ।
करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ॥
जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ ।
भक्तिः स्यात् परमा लोके ययाञ्जो दुर्गतिन्तरेत् ॥
अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महायशाः ।
जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत् ॥"
इति श्रीभागवते । १० । ८ । ४८-५० ॥
वेणुविशेषः । यथा,—
"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तमा वंशा मातङ्गमुनिसम्मताः ॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः ॥"
इति सङ्गीतदामोदरः ॥
(मृदङ्गविशेषः । यथा, महाभारते ।७।२३।८५।
"मृदङ्गौ चात्र विपुलौ दिव्यौ नन्दोपनन्दकौ ॥"
स्कन्दस्यानुचरविशेषः । इति महाभारते । ९ । ४५ । ६१ ॥ नागविशेषः । इति महाभारते । ५ । १०३ । १२ ॥ यक्षेश्वरस्यानुचरविशेषः । यथा, भागवते । ४ । ७ । २२ ।
"इमो मृडीतार्हणसादनोत्तमं
यक्षेश्वरं विश्वसृजां परं गुरुम् ।
सुनन्दनन्दाद्यनुगैर्वृतं मुदा
गृणन् प्रपेदे प्रयतः कृताञ्जलिः ॥"
धृतराष्ट्रस्य पुत्राणामन्यतमः । इति महाभारतम् । १ । ६७ । ९६ । मदिरागर्भजातो वसुदेवस्य पुत्रविशेषः । इति भागवतम् । ९ । २४ । ४८ ॥ क्रौञ्चद्वीपस्य वर्षपर्व्वतविशेषः । इति भागवतम् । ५ । २० । २१ ॥ तन्नाम ख्यातो दत्तकमीमांसाग्रन्थप्रणेता । यथा,—
"अभिवन्द्य जगद्वन्द्यमद्वन्द्वविनायकम् ।
पुत्त्रीकरणमीमांसां कुरुते नन्दपण्डितः ॥")

नन्दकः, पुं, (नन्दयतीति । नन्द + ण्वुल् ।) विष्णुखड्गः । इत्यमरः । १ । १ । १० ॥ (यथा, हरिवंशे । १२७ । ४४ ।
"रथाङ्गेनाथ शार्ङ्गेण गदया नन्दकेन च ।
प्रहरावस्य गरुडं दृढो भूत्वा जनार्द्दन ! ॥")
भेकः । इति त्रिकाण्डशेषः ॥ हर्षके कुलपालके च त्रि । इति मेदिनी । के, १०९ ॥ कृष्णपिता आनन्दः । आनन्दकारकश्च ॥ (नागविशेषः इति महाभारतम् । ५ । १०३ । ११ ॥ स्कन्दस्यानुचरविशेषः । इति महाभारतम् । ९ । ४५ । ६६ ॥ धृतराष्ट्रस्य पुत्रविशेषः । इति महाभारतम् । १ । १८७ । ३ ॥)

नन्दकिः, स्त्री, पिप्पली । इति शब्दचन्द्रिका ॥

नन्दकी, [न्] पुं, (नन्दकः खड्गोऽस्यास्तीति । नन्दक + इनिः ।) विष्णुः । यथा,—
"शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ॥"
इति महाभारते शान्तिपर्व्व ॥

नन्दगोपिता, स्त्री, (नन्दाय हर्षाय गोपिता रक्षिता ।) रास्ना । इति शब्दचन्द्रिका ॥